.. durgAsUktam ..

# ॥ दुर्गासूक्तम् स्वरांकित ॥

॥ अथ दुर्गा सूक्तम् ॥

ॐ जा॒तवे॑दसे सुनवाम॒ सोम॑ मरातीय॒तो निद॑हाति॒ वेदः॑ ।
स नः॑ पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वेव॒ सिन्धुं॑ दु॒रि॒ताऽत्य॒ग्निः ॥ १ ॥
ताम॒ग्निव॑र्णां॒ तप॑सा ज्वल॒न्तीं वै॑रोच॒नीं
कर्म॑फ॒लेषु॒ जुष्टा॑म् । दु॒र्गां दे॒विꣳ शर॑णम॒हं
प्रप॑द्ये सु॒तर॑सि तरसे॒ नमः॑ ॥ २ ॥
अग्ने॒ त्वं पा॑रया॒ नव्यो॑ अ॒स्मान्थ्स्व॒स्तिभि॒रति॑ दु॒र्गाणि॒ विश्वा॑ ।
पूश्च॑ पृ॒थ्वी ब॑हु॒ला न॑ उ॒र्वी भवा॑ तो॒काय॒ तन॑याय॒ शंयोः ॥ ३ ॥
विश्वा॑नि नो दु॒र्गहा॑ जातवेदः॒ सिन्धु॒न्न ना॒वा दु॑रि॒ताऽति॑पर्षि ।
अग्ने॑ अत्रि॒वन्मन॑सा गृणा॒नो॑ऽस्माकं॑ बोध्यवि॒ता त॒नूना॑म् ॥ ४ ॥
पृ॒त॒ना॒ जित॒ꣳ॒ सह॑मानमु॒ग्रम॒ग्निꣳ॒ हुवेम पर॒माथ्स॒धस्था॑त् ।
स नः॑ पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॒ क्षाम॑द्दे॒वो अति॑ दु॒रि॒तात्य॒ग्निः ॥ ५ ॥
प्र॒त्नोषि॑ क॒मीड्यो॑ अ॒ध्वरे॑षु स॒नाच्च॒ होता॒ नव्य॑श्च॒ सत्सि॑ ।
स्वाञ्चा॑ऽग्ने त॒नुवं॑ पि॒प्रय॑स्वा॒स्मभ्यं॑ च॒ सौभ॑ग॒माय॑जस्व ॥ ६ ॥
गोभि॒र्जुष्ट॑मयु॒जो निषि॑क्तन्तवे॑न्द्र विष्णो॒रनु॒संच॑रेम ।
नाक॑स्य पृ॒ष्ठम॒भि सं॒वसा॑नो॒ वैष्ण॑वीं लो॒क इ॒ह मा॑दयन्ताम् ॥ ७ ॥
ॐ का॒त्या॒य॒नाय॑ वि॒द्महे॑ कन्यकु॒मारि॑ धीमहि । तन्नो॑ दुर्गिः प्रचो॒दया॑त् ॥

॥ इति दुर्गा सूक्तम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

तैत्तिरीयारण्यकम् ४, प्रपाठकः १०, अनुवाकः २

Encoded by P. P. Narayanaswami swami@math.mun.ca
and with accents by Ganesan Iyer ganesan515151@yahoo.co.in

Please send corrections to sanskrit@cheerful.com
Last updated December 24, 2008